# २२ प्राणादपि संस्कृतिः श्रेष्ठा

पूर्वं श्रीहर्षः भारतस्य चक्रवर्ती आसीत् । तस्मिन् काले 'ह्युयन्त्साङ्गः' नाम चीनादेशीयः यात्री भारतम् आगतवान् । सः भारते अनेकेषु स्थलेषु अटितवान् । जनानां व्यवहारं ज्ञातवान् । भारतीयसंस्कृतिम् अवगतवान् । विविधान् धर्मग्रन्थान् विविधानि ऐतिहासिकवस्तूनि च सङ्गृहीतवान् ।

सः स्वदेशगमनतः पूर्वं हर्षचक्रवर्तिनं दृष्टवान् । तं स्वानुभवं निवेदितवान् । तस्मै कृतज्ञतां समर्पितवान् । हर्षः अपि तं सम्मानितवान् । तस्मै अनेकान् उपहारान् दत्तवान् । तस्य प्रयाणाय नौकां व्यवस्थापितवान् । रक्षणार्थं विंशतियोधान् अपि प्रेषितवान् ।

प्रयाणारम्भसमये हर्षः योधान् उद्दिश्य उक्तवान् - ''भोः भटाः ! एतस्यां नौकायां विविधाः भारतीयधर्मग्रन्थाः सन्ति । अनेकानि ऐतिहासिकवस्तूनि च सन्ति । एतानि भारतीयसंस्कृतेः प्रतीकानि, अमूल्यानि च । अतः एतेषां ग्रन्थानां, वस्तूनां च रक्षणं भवतां कर्तव्यम्'' इति ।

ततः सर्वे नौकायाम् उपविष्टवन्तः । नाविकाः नौकां चालितवन्तः । अनेकदिनपर्यन्तं ते सुखेन प्रयाणं कृतवन्तः । एकस्मिन् दिने ते समुद्रे अकस्मात् उत्पन्नस्य चण्डमारुतस्य प्रभावम् अनुभूतवन्तः । नौका दोलायमाना अभवत् । सर्वे अपायशङ्कां प्राप्तवन्तः ।

भीतः प्रधाननाविकः उक्तवान् - ''भोः, नौकायाः भारः अधिकः अस्ति । झटिति एतानि पुस्तकानि, ऐतिहासिकवस्तूनि च समुद्रे क्षिपन्तु । स्वप्राणान् रक्षन्तु'' इति ।

तदा योधनाविकः उक्तवान् - ''योधाः ! एषः अस्माकम् अग्निपरीक्षाकालः । धर्मग्रन्थानाम्, ऐतिहासिकवस्तूनां, तद्द्वारा भारतीयसंस्कृतेः च रक्षणम् अस्माकम् आद्यं कर्तव्यम् । तदर्थं सर्वे सज्जाः भवन्तु । प्राणसमर्पणेनापि कर्तव्यं पालनीयम्'' इति ।

नायकस्य वचनं श्रुत्वा सर्वे योधाः झटिति एकैकशः तृणमिव स्वशरीरम् एव समुद्रे क्षिप्तवन्तः । संस्कृतेः रक्षणार्थं स्वप्राणान् एव समर्पितवन्तः ।

अत्याश्चर्यकरम् एतत् दृश्यं दृष्ट्वा ह्युयन्त्साङ्गः नेत्राभ्याम् अश्रूणि स्रावितवान् ।

## अभ्यासः

१. एतेषां प्रश्नानाम् उत्तरम् एकवाक्येन लिखन्तु -

१. ह्युयन्त्साङ्गः कानि कानि सङ्गृहीतवान् ? ..........

२. स्वदेशगमनतः पूर्वं ह्युयन्त्साङ्गः किं कृतवान् ? ..........

३. योधनाविकः किम् उक्तवान् ? ..........

४. ह्युयन्त्साङ्गः भारते किं किं कृतवान् ? ..........

५. भीतः प्रधाननाविकः किम् उक्तवान् ? ..........

६. नायकस्य वचनं श्रुत्वा सर्वे किं कृतवन्तः ? ..........